# shrIshrIstavaH

# શ્રીશ્રીસ્તવઃ

## Document Information

Text title : shriistavaH

File name : shriistava.itx

Category : devii, lakShmI, stotra, devI, stava

Location : doc_devii

Author : kuresha shrIvatsA.nkamishrAchArya evaM shrI kuranAtha shrIvatsachinhamishra

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : One of Panchastavas http://www.prapatti.com/slokas/sanskrit/panchastavam.pdf

Latest update : July 08, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીશ્રીસ્તવઃ

પઞ્ચસ્તવ્યાં ૫ શ્રીસ્તવઃ

શ્રીગણેશાય નમઃ ।

સ્વસ્તિ શ્રીર્દિશતાદશેષજગતાં સ્વર્ગાપવર્ગસ્થિતીઃ
સ્વર્ગં દુર્ગતિમાપવર્ગિકપદં સર્વં ચ કુર્વન્હરિઃ ।
યસ્યા વીક્ષ્ય મુખં તદિઙ્ગિતપરાધીનો વિધત્તેઽખિલં
ક્રીડેયં ખલુ નાન્યથાઽસ્ય રસદા સ્યાદૈકરસ્યાત્તયા ॥ ૧॥

હે શ્રીર્દેવિ સમસ્તલોકજનનિ ત્વાં સ્તોતુમીહામહે
યુક્તાં ભાવય ભારતીં પ્રગુણય પ્રેમપ્રધાનાં ધિયમ્ ।
ભક્તિં બન્ધય નન્દયાશ્રિતમિમં દાસં જનં તાવકં
લક્ષ્યં લક્ષ્મિ કટાક્ષવીચિવિસૃતેસ્તે સ્યામ ચામી વયમ્ ॥ ૨॥

સ્તોત્રં નામ કિમામનન્તિ કવયો યદ્યન્યદીયાન્ગુણાનન્યત્ર
ત્વસતોઽધિરોપ્ય ભણિતિઃ સા તર્હિ વન્ધ્યા ત્વયિ ।
સમ્યક્સત્યગુણાભિવર્ણનમથો બ્રૂયુઃ કથં તાદૃશી
વાગ્વાચસ્પતિનાપ્યશક્યરચના ત્વત્સદ્ગુણાર્ણોનિધૌ ॥ ૩॥

યે વાચાં મનસાં ચ દુર્ગ્રહતયા ખ્યાતા ગુણાસ્તાવકાસ્તાનેવ
પ્રતિ સામ્બુજિહ્વમુદિતા યન્મામિકા ભારતી ।
હાસ્યં તત્તુ ન મન્મહે ન હિ ચકોર્યેકાઽખિલાં ચન્દ્રિકાં
નાલં પાતુમિતિ પ્રગૃહ્ય રસનામાસીત સત્યાં તૃષિ ॥ ૪॥

ક્ષોદીયાનપિ દુષ્ટબુદ્ધિરપિ નિઃસ્નેહોઽપ્યનીહોઽપિ
તે કીર્તિં દેવિ લિહન્નહં ન ચ બિભેમ્યજ્ઞો ન જિહ્રેમિ ચ ।
દુષ્યેત્સા તુ ન તાવતા ન હિ શુના લીઢાઽપિ ભાગીરથી
દુષ્યેચ્ચાપિ ન લજ્જતે ન ચ બિભેત્યાર્તિસ્તુ શામ્યેચ્છુનઃ ॥ ૫॥

ઐશ્વર્યં મહદેવ વાઽલ્પમથવા દૃશ્યેત પુંસાં હિ
યત્તલક્ષ્મ્યાઃ સમુદીક્ષણાત્તવ યતઃ સાર્વત્રિકં વર્તતે ।

તેનૈતેન ન વિસ્મયેમહિ જગન્નાથોઽપિ નારાયણો ધન્યં
મન્યત ઈક્ષણાત્તવ યતઃ સ્વાત્માનમાત્મેશ્વરઃ ॥ ૬॥

ઐશ્વર્યં યદશેષપુંસિ યદિદં સૌન્દર્યલાવણ્યયો
રૂપં યચ્ચ હિ મઙ્ગલં કિમપિ યલ્લોકે સદિત્યુચ્યતે ।
તત્સર્વં ત્વદધીનમેવ યદતઃ શ્રીરિત્યભેદેન વા યદ્વા
શ્રીમદિતીદૃશેન વચસા દેવિ પ્રથામશ્નુતે ॥ ૭॥

દેવિ ત્વન્મહિમાવધિર્ન હરિણા નાપિ ત્વયા જ્ઞાયતે
યદ્યપ્યેવમથાપિ નૈવ યુવયોઃ સર્વજ્ઞતા હીયતે ।
યન્નાસ્ત્યેવ તદજ્ઞતામનુગુણાં સર્વજ્ઞતાયા
વિદુર્વ્યોમામ્ભોજમિદન્તયા ખલુ વિદન્ ભ્રાન્તોઽયમિત્યુચ્યતે ॥ ૮॥

લોકે વનસ્પતિબૃહસ્પતિતારતમ્યં
    યસ્યાઃ કટાક્ષપરિણામમુદાહરન્તિ ।
સા ભારતી ભગવતી તુ યદીયદાસી
    તાં દેવદેવમહિષીં શ્રિયમાશ્રયામઃ ॥ ૯॥

યસ્યાઃ કટાક્ષમૃદુવીક્ષણદીક્ષિતેન
    સદ્યઃ સમુલ્લસિતપલ્લવમુલ્લલાસ ।
વિશ્વં વિપર્યયસમુત્થવિપર્યયં ત્વાં
    તાં દેવદેવમહિષીં શ્રિયમાશ્રયામઃ ॥ ૧૦॥

॥ ઇતિ શ્રી કુરેશ શ્રીવત્સાંકમિશ્રાચાર્ય એવં
શ્રી કુરનાથ શ્રીવત્સચિન્હમિશ્ર શ્રીસ્તવઃ સમ્પૂર્ણઃ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*shrIshrIstavaH*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*